"रसावस्था: स्पर्शो वपुषि वहलश्चन्दनरस: ॥"
यथा वा प्रबोधचन्द्रोदये । १ ।
"येन त्रि:सप्तकृत्वो नृपवहलवसामांसमस्तिष्कपङ्क-
प्राग्भारेऽकारि भूरिश्च्युतरुधिरसरिद्वारिपूरे-
ऽभिषेक: ॥")

वहलगन्धं, क्ली, ( वहल: प्रचुरो गन्धो यस्य । ) शम्बरचन्दनम् । इति राजनिर्घण्ट: ॥

वहलचक्षु:, [स्] पुं, ( वहलानि प्रचुराणि चक्षूंषीव पुष्पाण्यस्य । ) मेषशृङ्गी । इति रत्नमाला ॥ पुस्तकान्तरे ।
"नन्दीवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चक्षुर्व्वहलं चक्षुश्च मेढ्रशृङ्गी गृहद्रुमा: ॥"
इत्यपि पाठ: ॥

वहलत्वच:, पुं, (वहला दृढ़ा त्वचा वल्कलं यस्य ।) श्वेतलोध्र: । इति राजनिर्घण्ट: ॥

वहला, स्त्री, ( वहलानि प्रचुराणि पुष्पाणि सन्त्यस्या इति । अर्श आदित्वादच् । ) शतपुष्पा । इति राजनिर्घण्ट: ॥ स्थूलैला । इति भावप्रकाश: ॥ ( अस्या: पर्य्यायो यथा,—
"एला तु वहला स्थूला मालेयं ताड़काफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥ )

वहा, स्त्री, ( वहतीति । वह + अच् । टाप् । ) नदी । इति हेमचन्द्र: । ४ । १४६ ॥

व(ब)हि:, [स्] य, वाह्यम् । इत्यमर: ॥ ( यथा, मनु: । १० । ४५ ।
"मुखवाहूरुपज्जानां या लोके जातयो वहि: ।
म्लेच्छवाचश्चार्य्यवाच: सर्व्वे ते दस्यव: स्मृता: ॥"
यथा च, रामायणे । २ । ५३ । २ ।
"अद्येयं प्रथमा रात्रिर्याता जनपदात् वहि: ।
या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हसि ॥")

व(ब)हि:कुटीचर:, पुं, ( वहि:कुट्यां चरतीति । चर + ट: । ) कुलीर: । इति त्रिकाण्डशेष: ॥

वहित:, त्रि, (अवधीयते स्मेति । अव + धा + क्त: । अवस्यातो लोप: ।) अवहित: । इति द्विरूपकोष: ॥

वहित्रं, क्ली, (वहति द्रव्याणीति । वह + "अशित्रादिभ्य इत्रोत्रौ ।" उणा० ४।१७२। इति इत्र: ।) पोत: । तत्पर्य्याय: । वार्व्वट: २ । इति त्रिकाण्डशेष: ॥ ( यथा, गीतगोविन्दे । १ । ५ ।
"प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ॥")

वहित्रकं, क्ली, (वहित्र + स्वार्थे कन् ।) जलयानम् । यथा, हेमचन्द्रे ।
"सांयात्रिक: पोतवणिक् यानपात्रं वहित्रकम् ।
वोहित्थं वहनं पोत: पोतवाहो नियामक: ॥"

व(ब)हिर्द्वारं, क्ली, (वहि:स्थं द्वारम् । ) तोरणम् । इत्यमर: ॥ ( यथा,—
"धिगस्त्वेता विद्या धिगपि कविता धिक्सुजनता
वयो रूपं धिक् धिगपि च यशो निर्द्धनमत: ।
असौ जीयादेक: सकलगुणहीनोऽपि धनवान्
वहिर्द्वारे यस्मात्तृणलवसमा: सन्ति गुणिन: ॥"
इत्युद्भट: ॥)

व(ब)हिर्द्वारप्रकोष्ठक:, पुं, ( वहिर्द्वारस्य प्रकोष्ठक: । ) गृहस्य द्वाराद्वहि: प्रकोष्ठम् । तत्पर्य्याय: । प्रघाण: २ प्रघण: ३ अलिन्द: ४ । इत्यमर: । २ । २ । १२ ॥

व(ब)हिर्भूत:, त्रि, (वहिस् + भू + क्त: ।) वहिर्गत: । वहि:शब्दपूर्व्वकप्राप्त्यर्थभूधातो: कर्त्तरि क्तप्रत्ययेन निष्पन्न: । यथा । "पक्षविषयिता-वहिर्भूतसाध्यविषयिताघटितधर्म्मावच्छिन्नप्रतिवध्यताशालिसंशय: पक्षता ॥" इति जगदीश: ॥

व(ब)हिर्मुख:, त्रि, ( वहिर्बाह्यविषये मुखं प्रवणता यस्य । ) विमुख: । यथा, नरसिंहाचार्य्यधृतशानसंहितायाम् ।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजक: ।
सर्व्वं पूजाफलं हन्ति शिवरात्रिवहिर्मुख: ॥"
इति तिथ्यादितत्त्वम् ॥

व(ब)हिश्चर:, पुं, ( वहिश्चरतीति । चर + ट: । ) कर्कट: । इति हेमचन्द्र: ॥ ( वहिश्चरणशीले, त्रि । यथा, मार्कण्डेये । २३ । ८३ ।
"युवयोर्यन्मदीयं तन्मामकं युवयो: स्वकम् ।
एतत्सत्यं विजानीतं युवां प्राणा वहिश्चरा: ॥")

वहेडुक:, पुं, विभीतकवृक्ष: । इति राजनिर्घण्ट: ॥

वह्नि:, पुं, ( वहति धरति हव्यं देवार्थमिति । वह + "वहिश्रिश्रुयुद्रु" इति । उणा० ४ । ५१ । इति नि: । ) चित्रक: । भल्लातक: । ( यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"मञ्जिष्ठाद्यौ वासको देवदारु
पथ्यावह्नी चोषधात्री विड़ङ्गम् ॥" )
निम्बूक: । इति राजनिर्घण्ट: ॥ रेफ: । इति तन्त्रम् ॥ अग्नि: । इत्यमर: ॥ * ॥ तस्य नामानि यथा,—
"ते जातवेदस: सर्व्वे कल्माष: कुसुमस्तथा ।
दहन: शोषणश्चैव तपनश्च महाबल: ।
पिटर: पतग: स्वर्णस्त्वगाधो भ्राज एव च ॥"
अन्यत्र तु नामान्तराण्युक्तानि यथा,—
"जृम्भकोद्दीपकश्चैव विभ्रमभ्रमशोभना: ।
अवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नय: ॥"
अन्यैरन्यथोक्तानि यथा,—
"भ्राजको रञ्जकश्चैव क्लेदक: स्नेहकस्तथा ।
धारको बन्धकश्चैव द्रावकाख्यश्च सप्तधा ।
व्यापक: पावकश्चैव श्लेष्मको दशम: स्मृत: ॥"
शरीरस्थवह्ने: स्थानानि यथा,—
"वह्नयो दोषदूष्येषु संलीना दश देहिन: ॥"
दोषदूष्यौ यथा,—
"वातपित्तकफा दोषा दूष्या: स्यु: सप्त धातव: ॥"
इति सारदातिलक: ॥
तत्र निषिद्धकर्म्माणि यथा,—
"नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेदृषीन् ।
न चाग्निं लङ्घयेद्धीमान् नोपदध्यादध: क्वचित् ॥
न चैनं पादत: कुर्य्यात् मुखेन न धमेद्बुध: ।
अग्नौ न नि:क्षिपेदग्निं नाद्भि: प्रशमयेत्तथा ॥
न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुध: ।
स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् ॥
नापक्षिपेन्नोपधमेत् न सूर्पेण च पाणिना ।
मुखेनाग्निं समिन्धीत मुखादग्निरजायत ॥"
इति कौर्म्मे उपविभागे १५ अध्याय: ॥
अस्योत्पत्तिर्यथा,—
शौनक उवाच ।
"सर्व्वं श्रुतं महाभाग परिपूर्णं मनो मम ।
अधुना श्रोतुमिच्छामि वह्नेरुत्पत्तिमीप्सिताम् ॥
सूत उवाच ।
एकदा सृष्टिकाले च ब्रह्मानन्तमहेश्वरा: ।
श्वेतद्वीपं ययु: सर्व्वे द्रष्टुं विष्णुं जगत्पतिम् ॥
परस्परञ्च संभाषां कृत्वा सिंहासनेषु च ।
ऊषु: सर्व्वे सभामध्ये सुरम्ये पुरतो हरे: ॥
विष्णुगात्रोद्भवास्तत्र कामिन्य: कमलाकला: ।
तत्र नृत्यन्ति गायन्ति विष्णुगाथाश्च सुस्वरम् ॥
तासाञ्च कठिनां श्रोणिं कठिनं स्तनमण्डलम् ।
सस्मितं मुखपद्मञ्च दृष्ट्वा ब्रह्मा स कामुक: ॥
मनो निवारणं कर्त्तुं न शशाक पितामह: ।
वीर्य्यं पपात चस्कन्द लज्जया वाससा विभु: ॥
तद्वीर्य्यं वस्त्रसहितं प्रतप्तं कामतापित: ।
क्षीरोदे प्रेरयामास सङ्गीते विरते द्विज ॥
जलादुत्थाय पुरुष: प्रज्वलन् ब्रह्मतेजसा ।
उवास ब्रह्मण: क्रोड़े लज्जितस्य च संसदि ॥
एतस्मिन्नन्तरे रुष्टो जलादुत्थाय सत्वर: ।
प्रणम्य वरुणो देवान् बालं नेतुं समुद्यत: ॥
बालो दधार ब्रह्माणं बाहुभ्याञ्च भयाद्रुदन् ।
किञ्चिन्नोवाच जगतां विधाता लज्जया द्विज ॥
बालकस्य करे धृत्वा चकाराकर्षणं रुषा ।
वरुणश्च सभामध्ये तं चिक्षेप प्रजापति: ॥
पपात दूरतो देवो वरुणो दुर्ब्बलस्तथा ।
मूर्च्छां संप्राप मृतवत् कोपदृष्ट्या विधेरहो ॥
चेतनं कारयामासामृतदृष्ट्या च शङ्कर: ।
संप्राप्य चेतनां तत्र तमुवाच जलेश्वर: ॥
वरुण उवाच ।
बालो जले समुद्भूतो मम पुत्त्रोऽयमीप्सित: ।
अहं गृहीत्वा यास्यामि ब्रह्मा मां ताड़येत्
कथम् ॥
ब्रह्मोवाच ।
बालक: शरणापन्नो मयि विष्णो महेश्वर ।
कथं दास्यामि भीतञ्च रुदन्तं शरणागतम् ॥
शरणागतदीनार्त्तं यो न रक्षेदपण्डित: ।
पच्यते निरये तावद् यावच्चन्द्रदिवाकरौ ॥
उभयोर्व्वचनं श्रुत्वा प्रहस्य मधुसूदन: ।
उवाच सर्व्वतत्त्वज्ञ: सर्व्वेशश्च यथोचितम् ॥
भगवानुवाच ।
दृष्ट्वा सुकामिनीश्रोणिं वीर्य्यं धातु: पपात तत् ।
लज्जया प्रेरयामास क्षीरोदे निर्म्मले जले ॥
ततो वभूव बालश्च धर्म्मतो विधिपुत्त्रक: ।
क्षेत्रजश्च सुत: शास्त्रे वरुणस्यापि गौणत: ॥
महादेव उवाच ।
यो विद्यायोनिसम्बन्धो वेदेषु च निरूपित: ।
शिष्ये पुत्त्रे च समता चेति वेदविदो विदु: ॥